टङ्गनी, स्त्री, ( टङ् इत्यव्यक्तशब्दं नयतीति । नी+क्विप् । ) ज्येष्ठी । इति त्रिकाण्डशेषः ॥

टट्टरी, स्त्री, ( टट्टमित्यव्यक्तशब्दं रातीति । रा+कस्ततो ङीष् । ) मृषावादः । लम्पावाद्यम् । पटहवाद्यम् । इति मेदिनी । रे, १५६ ॥

टट्टुरः, पुं, ( टट्टु इत्यव्यक्तशब्दं रातीति । रा+कः । ) भेरीशब्दः । इति हेमचन्द्रः ॥

टल, ज विक्लवे । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सेट् । ) ज, टालः टलः । विक्लवो विह्वलीभावः । इति दुर्गादासः ॥

टलनं, क्ली, ( टल+भावे ल्युट् ।) विक्लवः । टला इति भाषा ॥

टा, स्त्री, ( टलति प्रलये भूकम्पादौ वा । टल+ड टाप् च ।) पृथिवी । इत्येकाक्षरकोषः ॥

टाङ्करः, पुं, ( टङ्कस्येदं टाङ्कम् । टङ्क+अण् । टाङ्कं रातीति । रा+कः । ) नागवीटः । इति त्रिकाण्डशेषः ॥

टारः, पुं, ( टां पृथ्वीं ऋच्छतीति । ऋ+अण् । ) लङ्गः । तुरङ्गः । इति हेमचन्द्रः ॥

टिक, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ ( भ्वां-आत्मं-सकं-सेट् । ) ऋ, अटिटेकत् । ङ, टेकते । इति दुर्गादासः ॥

टिटिभकः, पुं, ( टिटीत्यव्यक्तशब्दं भषति । भष+डः । ततः स्वार्थे कन् । ) टिट्टिभपक्षी । इत्यमरटीका ॥

टिट्टिभः, पुं, ( टिट्टीत्यव्यक्तशब्दं भषतीति । भष+डः । ) पक्षिविशेषः । टीठि इति भाषा । तत्पर्य्यायः । टीठिभकः २ । इति शब्दरत्नावली ॥ टिट्टिभकः ३ । इत्यमरः । २।५।३५ ॥ टिट्टिभकः ४ । इति तट्टीका ॥ ( यथा, मनुः । ५ । ११ ।

"अनिर्द्दिष्टांश्चैकशफांष्टिट्टिभञ्च विवर्ज्जयेत् ॥")

चतुर्दशमन्वन्तरीयेन्द्रशत्रुदानवविशेषः । यथा,

"इन्द्रो दिवस्पतिः शत्रुष्टिट्टिभो नाम दानवः ।
मायूरेण च रूपेण घातयिष्यति माधवः ॥"

इति गारुडे ८७ अध्यायः ॥

( यदुवंशभारवकदानवानामन्यतमः । अयं हि मर्त्त्यधर्म्मविवर्ज्जितः । यथा, महाभारते । २ । ८ । १५ ।

"टिट्टिभो विटभूतश्च संह्रादश्चेन्द्रतापनः ॥"

इत्युपक्रम्याह ।

"सर्व्वे चम्बरराः शूराः सर्व्वे विगतमृत्यवः ॥")

टिट्टिभकः, पुं, ( टिट्टिभ+स्वार्थे कन् । ) टिट्टिभपक्षी । इत्यमरः । २।५।३५ ॥ [ प्रकाशः ॥

टिण्टिम्बिका, स्त्री, अम्लशिरीषिका । इति भाव-

टिण्डिशः, पुं, क्षुपविशेषः । डिण्डिशा । इति ढेँड्शी इति च भाषा । तत्पर्य्यायः । रोमशफलः २ तिण्डिशः ३ मुनिनिर्म्मितः ४ । इति राजनिर्घण्टः ॥ डिण्डिशः ५ । अस्य गुणाः । ) रुचिकारित्वम् । भेदकत्वम् । पित्तश्लेष्मापहरीतोशित्वम् । सशीतलत्वम् । वातलत्वम् । रूक्षत्वम् । मूत्रलत्व च । इति भावप्रकाशः ॥

टिप, क क्षुदि । इति कविकल्पद्रुमः ॥ ( चुरां-परं-सकं-सेट् । ) क, टेपयति । क्षुदि प्रेरणे । इति दुर्गादासः ।

टिप्पनी, स्त्री, ( टेपयति व्याख्यायतेऽनया । टिप+करणे ल्युट् ङीप् च । पृषोदरादित्वात् पस्य द्वित्वे साधुः । ) टीका । यथा,—

"श्रीमत्कृष्णाननं नत्वा लीलावत्याः सुटिप्पनी ।
भवेशेन सुबोधार्थं क्रियते यद्गुरोः श्रुतम् ॥" )

टीक, ऋ ङ गत्याम् । इति कविकल्पद्रुमः । (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अटिटीकत् । ङ, टीकते । इति दुर्गादासः ॥

टीका, स्त्री, ( टीक्यते गम्यते प्रविश्यते ज्ञायते वानया । टीक+घञर्थे कः । टाप् च ।) विवरणग्रन्थः । इति लिङ्गादिसंग्रहे अमरः ॥

टुण्टुकः, पुं, श्योनाकवृक्षः । इत्यमरः । २।४।५६ ॥ कृष्णखदिरवृक्षः । इति शब्दचन्द्रिका ॥ ( टुण्टु इत्यव्यक्तशब्देन कायति शब्दायते इति । कै+कः । ) पक्षिविशेषः । इति शब्दरत्नावली ॥ टुण्टुनि इति भाषा । श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥

टुण्टुकः, त्रि, नीचः । इति मेदिनी ॥ क्रूरः । इति विश्वः ॥

टुण्टुका, स्त्री, टङ्कियीवृक्षः । इति शब्दचन्द्रिका ॥

टुनाका, स्त्री, तालमूलीवृक्षः । इति शब्दचन्द्रिका ॥

टेरकः, त्रि, वक्रचक्षुः । टेरा इति भाषा । तत्पर्य्यायः । वलिरः २ केकरः ३ केदरः ४ । इति शब्दरत्नावली ॥

ट्वल, ज विक्लवे । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सेट् । ) वकारयुक्तः । ज, ट्वालः ट्वलः । विक्लवो विह्वलीभावः । इति दुर्गादासः ॥

---

## ठ

ठ, ठकारः । स व्यञ्जनद्वादशवर्णः टवर्गद्वितीयवर्णश्च । (अर्द्धमात्राकालेनोच्चार्य्योऽयं वर्णः । ) अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (अस्योच्चारणे जिह्वामध्येन मूर्द्धस्थानस्पर्शः आभ्यन्तरप्रयत्नः । विवारश्वासघोषा महाप्राणश्च बाह्यप्रयत्नाः । वङ्गवर्णमालायाम् ) तस्य लेखनप्रकारो यथा,—

"वामाद्वर्त्तुलाकारो रेखाधिष्ठितदेवताः ।
तिष्ठन्ति क्रमतो नित्यं चन्द्रसूर्य्याग्नयः प्रिये ! ॥
मात्राहीनस्तूर्द्ध्वशिखष्ठकारः परमेश्वरि ! ॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने ! ।
पूर्णचन्द्रप्रभां देवीं विकसत्पङ्कजेक्षणाम् ॥
सुन्दरीं षोड़शभुजां धर्म्मकामार्थमोक्षदाम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"

इति तन्त्रोद्धारतन्त्रम् ॥ ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।

"ठकारं चञ्चलापाङ्गि ! कुण्डली मोक्षरूपिणी ।
पीतविद्युल्लताकारं सदा त्रिगुणसंयुतम् ॥
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा ।
त्रिबिन्दुसहितं वर्णं त्रिशक्तिसहितं सदा ॥"

तस्य ३१ एकत्रिंशन्नामानि यथा —

"ठः शून्यो मञ्जरी बीजः पाणिनी लाङ्गली क्षया ।
वनजो नन्दनो जिह्वा सुनखो घूर्णकः सुधा ॥
वर्त्तुलः कुण्डलो वह्निरमृतं चन्द्रमण्डलः ।
दक्षजानुभावश्च देवभक्षो बृहद्ध्वनिः ॥
एकपादो विभूतिश्च ललाटं सर्व्वमित्रकः ।
वृषघ्नो नलिनी विष्णुर्महेशो ग्रामणीः शशी ॥"

इति नानातन्त्रशास्त्रम् ॥

ठः, पुं, शिवः । महाध्वनिः । चन्द्रमण्डलः । इत्येकाक्षरकोषः ॥ मण्डलः । शून्यम् । लोकगोचरः । इति मेदिनी । ठे, १ ॥

ठक्कुरः, पुं, देवता । ठाकुर इति ख्यातः । यथा,

"श्रीदामनामगोपालः श्रीमान् सुन्दरठक्कुरः ॥"

इत्यनन्तसंहिता ॥

ठठं } ठठठं } क्ली, अनुकरणशब्दः । ठन् ठन् इति भाषा । यथा, महानाटके । ८६ ।

"रामाभिषेके मदविह्वलाया:
कक्षाच्युतो हेमघटस्तरुण्याः ।
सोपानमारुह्य चकार शब्दं
ठठं ठठं ठं ठठठ ठठं ठः ॥"

ठेरः, त्रि, वृद्धः । यथा, जा ठेरं व्व हसन्ती । इति काव्यप्रकाशे देशीभाषा ॥

---

## ड

ड, डकारः । स व्यञ्जनत्रयोदशवर्णः टवर्गतृतीयवर्णश्च । अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ ( यथा, शिक्षायाम् । १७ ।

"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः ॥")

वङ्गीयवर्णमालायामस्य लेखनप्रकारो यथा,

"ऊर्द्धाधःक्रमतो रेखा मध्ये त्वाकुञ्चिता तथा ।
लक्ष्मीर्व्वाणी भवानी च क्रमशस्तत्र संस्थिता ॥
ब्रह्मरूपा तथा मात्रा महाशक्तिः प्रकीर्त्तिता ।
ध्यानमस्य प्रवक्ष्यामि शृणुष्वावहिता मम ।
जवासिन्दूरसङ्काशां वराभयकरां पराम् ॥
त्रिनेत्रां वरदां नित्यां परमोक्षप्रदायिनीम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"

इति वर्णोद्धारतन्त्रम् ॥ ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।

"डकारं चञ्चलापाङ्गि ! सदा त्रिगुणसंयुतम्
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा ॥
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ।
चतुर्ज्ञानमयं वर्णं आत्मादितत्त्वसंयुतम् ॥
पीतविद्युल्लताकारं डकारं प्रणमाम्यहम् ।"

तस्य २४ चतुर्विंशतिनामानि यथा,—

"डः स्मृतिर्दारुको नन्दिरूपिणी योगिनी प्रियः ।
कौमारी शङ्करस्त्रासस्त्रिवक्रो नदको ध्वनिः ।